स्पर्शनम् १३ निषिद्धपुष्पेण विष्ण्वर्च्चनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोः स्पर्शनम् १६ कृष्णवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोद्भूतवासः परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० हंसजालपादसरारिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तमप्रक्षाल्य विष्णोःस्पर्शनं कर्म्मकरणं वा २२ श्मशानं गत्वाऽस्नात्वा विष्णूपसर्पणम् २३ पिन्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमाघ्राय पीत्वा स्पृष्ट्वा वा विष्णुगृहप्रवेशनम् २६ परकीयेणाशुचिना वस्त्रेण परिहितेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पे अप्रदाय धूपदीपदानम् २९ उपानद्भ्यावारुह्य विष्णुस्थानप्रवेशनम् ३० भेरिशब्देन विना विष्णुप्रबोधनम् ३१ अजीर्णे सति विष्णुस्पर्शनम् ३२ इति” एतदुपलक्षणम् “अपराधसहस्राणि, अपराधशतानि चेति” मन्त्रलिङ्गात् “अहन्यहनि योमर्त्त्यो गीताध्यायन्तु संपठेत् । द्वात्रिंशदपराधैस्तु अहन्यहनि मुच्यते” इति नरसिंहपुरा० ।

**अपराधय** त्रि० अपराधं याति या—ड । अपराधप्राप्ते । ब्राह्म० भावे कर्म्मणि च ष्यञ् आपराधय्यं तस्य भावे तत्कर्म्मणि च न० । [कारके, स्त्रियां ङीप् ।

**अपराधिन्** त्रि० अप+राध—णिनि । कृतागसि अपराध

**अपरान्त** पु० ‘अपरस्याः पश्चिमायाः अन्तः सीमाभूतोदेशः । देशभेदेऽस्य पश्चिमदिशः सीमाभूतत्वात्तथात्वम् स च देशः कतम इति तावन्निर्णीयते “तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णव इति” रघुः । तेनास्य सह्यपर्व्वत सन्निकृष्टत्वम् । ‘अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ । अपरान्तमहीपालव्याजेन रघवे करमिति” रघुः तेनार्णवसन्निकृष्टत्वं च प्रतीयते । तत्रैव देशे रघौ “त्रिकूटमेव तत्रोच्चं जयस्तम्भं चकार स” इति त्रिकूट पर्व्वतवर्णनात् त्रिकूटयुक्तत्वञ्च तस्य प्रतीयते । “पारसीकांस्ततोजेतुमित्यनन्तरोक्तेश्च पारसीकदेशात् पूर्व्वत्वं प्रतीयते पारसीकदेशस्य पाश्चात्त्यः ‘संग्रामस्तुमुलस्तस्य पाश्चात्त्यैरश्वसाधनैरिति” तेषां पाश्चात्त्यत्वस्य तत्रैव वर्णनात् । वृहत्संहितायाञ्च “नव भारतवर्षे मध्यात् प्रागादिविभाजिता देशा” इत्युपक्रम्य “अपरस्यां मणिमान् मेघवान् वनौघः क्षुरार्पणोऽस्तगिरिः । अपरान्तशान्तिकहैहयप्रशस्ताद्रिकोङ्कणा” इत्यादिना मध्यस्थानात्तस्य पश्चिमदिक्स्थत्वमुक्तम् तत्र च मुरला नाम नदी । “मुरलामारुतोद्धूतमिति” रघौ तत्र तस्या वर्णनात् तदवान्तरदेशः केरलः । “भयोत्सृष्टविभूषाणां तत्र केरलयोषितामिति” रघौ तथा वर्णनात् । जनपदवाचित्वात् तद्धिताणोलुकि तद्देशभवे तद्राजनि च ब०व० । ‘उन्मूर्द्धानः सन्निपत्यापरान्तैरिति” माघः ।

**अपरार्क** पु० स्मृतिसंग्रहभेदे ।

**अपरार्द्ध** पु० न परार्द्धम् । परार्द्धभिन्ने । अपरमर्द्धमिति वाक्ये तु अपरस्य पश्चाद्देशे पश्चार्द्धमित्येव ।

**अपरावर्त्तिन्** त्रि० न परावर्त्तते परा+वृत—णिनि न०त० । अपराङ्मुखे कार्य्यं समाप्तिमकृत्वाऽनिवर्त्तिनि स्त्रियां ङीप् ।

**अपराह्ण** पु० अपरमह्नः एक०त०टच् अह्नादेशः । दिनशेषभागे स च द्विधा विभक्तस्य, त्रिधा विभक्तस्य च दिनस्य शेषभागः । “पूर्व्वं दिनं मनुष्याणामपराह्णः पितृणामिति” श्रुतौ द्विधा विभजनात् ‘पूर्व्वाह्णोवै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणामिति श्रुतौ त्रिधा विभजनाच्च तयोस्तेषु वा शेषस्य तथात्वम् । तथा च द्विधा विभक्तस्य दिनस्य शेषार्द्धम्, त्रिधा विभक्तस्य तृतीयार्द्धं च अपराह्णः । “ययास्तं सविता याति पितरस्तामुपासते । तिथिं तेभ्योऽपराह्णो हि स्वयं दत्तः स्वयंभुवेति” स्मृतिः । “तथा श्राद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते” मनुः । पञ्चधा विभक्तस्य तु चतुर्थभागे च तस्य च कर्म्मयोग्येतरापेक्षयाऽपरत्वात् तथात्वम् । अन्तिमत्रिमुहूर्त्तस्य तु राक्षसवेलात्वेन कर्म्मानर्हत्वात् कर्म्मयोग्य शेषभागत्वाभावान्नापराह्णत्वम् । तथा च “प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु । मध्याह्नस्त्रिमुहूर्त्तःस्यादपराह्णस्ततस्तथा । सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत् । राक्षसी नाम सा वेला गर्हिता सर्वकर्म्मस्विति” त्रित्रिमुहूर्त्तात्मकतया पञ्चधा विभक्तदिनस्य चतुर्थे भागे कर्म्मार्हापराह्णत्वेन परिभाषणात्तथात्वम् । लौकिके तु मध्याह्नात्परतः, सूर्य्यास्तात् प्राक्कालोऽपराह्णत्वेन व्यवह्रियते इति” भेदः । ततः भवार्थे वा वुन् अपराह्णकः तद्भवे त्रि० । पक्षे तदर्थे ठञ् आपराह्णिकः । तद्भवे त्रि० । श्राद्धे चैवापराह्णिक” इति स्मृतिः । स्त्रियां ङीप् । “पार्वणे पितृकृत्ये च तिथिर्ग्राह्यापराह्णिकीति” स्मृतिः ।

**अपराह्णतन** त्रि० अपराह्णे भवः ट्युल् तुट् च । अपराह्ण-